**कुटिचर** पुंस्त्री० कुटि कुटिलं जले चरति चर—अच् । जलशूकरे (शुशुक)शब्दरत्ना० स्त्रियां जातित्वात् ङीष् ।

**कुटित** त्रि० कुट—इतच् । कुटिले उज्ज्वलदत्तः ।

**कुटिर** न० कुट—इरन् किच्च । (कुँडे) खल्पगृहे भरतः

**कुटिल** त्रि० कुट—इलच् । १वक्रे अमरः "भ्रुकुटीकुटिलास्यायाः" देवीमा० । २तगरपुष्पे न० राजनि० "मुगदिगभि: कुटिलमिति मतं स्त्रौ म्नौ गौ" वृ०र०टी०उक्ते ३छन्दोभेदे न० ४नदीभेदे (बाँका) ५सरस्वत्यां स्त्री मेदि० ६स्पृक्कानाम गन्धद्रव्ये स्त्री राजनि० ।

**कुटी** स्त्री कुट—इन् ङीप् । १गृहे २कुटिन्यां ३मुरानामगन्धद्रव्ये च मेदि० ।

**कुटीकुट** न० कुटी च कुटश्च गवा० नि० समा० द्व० । कुटीकुटयोः समाहारे ।

**कुटीकृत** न० कुटि+च्वि—कृ—क्त । गृहीकृते वस्त्रे "और्णञ्च राङ्कवञ्चैव कीटजं पट्टजं तथा । कुटीकृतं तथैवात्र कमलाभं सहस्रशः" भा०स० १८४७श्लो० ।

**कुटीचक** पु० कुट्यां चकते तृप्नोति चक—तृप्तौ अच् । संन्यासिभेदे "चतुर्विधा भिक्षवस्ते कुटीचकबहूदकौ । हंसः परमहंसश्च योऽत्र पश्चात् स उत्तमः" भा० आनु० १४अ० । कुटीचकलक्षणादिकम् आश्रमशब्दे ८४१पृ०दर्शितम् "न्यासे कुटीचकः पूर्व्वं बह्वौदो हंसनिष्क्रियौ" भाग०३,१२,२७

**कुटीमय** त्रि० कुट्या विकारो ऽवयवो वा शरा० मयट् । १कुट्यवयवे तद्विकारे च स्त्रियां ङीप् ।

**कुटीमुख** पु० कुटीव मुखमस्य । शिवपारिषदभेदे । "शङ्कुकर्णमुखाः सर्वे शैवाः पारिषदास्तथा । कालः कुटीमुखो दन्ती विजया च तपोऽधिका" भा०स०१०अ०, ।

**कुटीय** कुट्यामिवाचरति क्यच् नामधा० पर० अक० सेट् कुटीयति प्रासादे सि० कौ० ।

**कुटीर** पु० ह्रस्वा कुटी ह्रस्वार्थे रः स्वार्थिकप्रत्ययस्य क्वचित् प्रकृतिलिङ्गातिक्रमस्योक्तेः पुंस्त्वम् । १ह्रस्वायां कुट्याम् "कूजितकुञ्जकुटीरे" जयदे० तस्यावयवः बिल्वा० अण् । कौटीर कुटीरावयवे तद्विकारे वा त्रि० । स्त्रियां ङीप् २केवले ३रते च हेम० । [ स्वार्थे क । तत्रैव ।

**कुटीचर** पु० कुट्यां चरति चर—ट । कुटीचके भिक्षुभेदे

**कुटुङ्गक** पु० कुटङ्ग—पृषो० । १पटले छदिषि भरतः २गृहभेदे ३पिटे (डोल) वंशादिनिर्म्मिते धान्याद्याधारे पात्रे

**कुटुनी** स्त्री कुट—उन गौरा०ङीष् । कुट्टिन्याम् अमरटीका ।

**कुटुम्ब** ष्टतौ चुरा० आत्म० अक० सेट् । कुटुम्बयते अचुकुटुम्बत । कुटुम्बः प्रनिकुटुम्बयते ।

**कुटुम्ब** पु० न० कुटुम्ब—अच् । १पोष्यवर्गे अमरः २बान्धवे ३सन्ततौ ४नामनि शब्दरत्ना० । "कुटुम्बं बिभृयात् भ्रातुर्योविद्यामधिगच्छतः । भागोयवीयसां तत्र यदि विद्यानुपालिनः" दा० भा० स्मृतिः "तस्य स्वजनं ज्ञात्वा कुटुम्बांश्च महीपतिः । श्रुतशीले च विज्ञाय वृत्तिं धर्म्म्यां प्रकल्पयेत्" "न निर्हारं स्त्रियः कुर्य्युः कुटुम्बाद्बहुमध्यगात्" "वैश्यशूद्रावपि प्राप्तौ कुटुम्बेऽतिथिधर्म्मिणौ" मनुः स्वार्थे क । तत्रैव पु०न० "अयं निजः परोवेति गणना लघुचेतसाम् । उदारचरितानां तु वसुधैव कुटुम्बकम्" हितो० । [ खासक्त ।

**कुटुम्बव्यापृत** त्रि० कुटुम्बे तद्भरणे व्यापृतः । कुटुम्बभर-

**कुटुम्बिक** त्रि०कुटुम्बोऽस्त्यस्य ठन् । कुटुम्बयुक्ते गृहस्थाश्रमे "मुनिश्च स्यात् सदा विप्रो वेदांश्चैव सदा जपेत् । कुटुम्बिकोधर्म्मकामः सदाऽस्वप्नश्च मानवः" भा० आनु० ८३अ० इनि । कुटुम्बिन् अपि तत्रार्थे । "आशासते कुटम्बिभ्यस्तेभ्यः काय्यं विजानता" "प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः" कुमा० । २कर्षके त्रि० शब्दच० ।

**कुटुम्बिनी** कुटुम्बोऽस्त्यास्या इनि ङीप् । १भार्य्यायां पतिपुत्रवत्यां २स्त्रियां "शौचं तु च यावत् कुरुते भाजने तु कुटम्बिनी" भा० व० २०५अ० । कुटुम्बानां समूहः खला० इनि । ३कुटुम्बसमूहे स्त्री । ४क्षीरिण्यां क्षुपभेदे राजनि० ।

**कुट्ट** छेदने, निन्दने च अद० चुरा०उभ०सक०सेट् । कुट्टयति ते अचुकुट्टत् त । प्रनिकुट्टयति काष्ठकुट्टः शिलाकुट्टः

**कुट्ट** प्रतापने अद०चुरा०आत्म०सक०सेट् । कुट्टयते अचुकुट्टत ।

**कुट्टक** त्रि० कुट्ट—ण्वुल् । छेदके "दन्तोलूखलिकः कालपक्काशी वाश्मकुट्टकः । १लीलावत्यादौ प्रसिद्धे २गणितोपयोगिक्रियाभेदे कुट्टकविधिश्च लीलावत्यां संक्षेपेणोक्तः बीजगणिते कुट्टकाध्याये विशेषेणोक्तो यथा "भाज्योहारः क्षेपकश्चापवर्त्त्यः केनाप्याद्यौ सम्भवे कुट्टकार्थम् । येन च्छिन्नौ भाज्यहारौ न तेन क्षेपश्चैतद्दृष्टमुद्दिष्टमेव । परस्परं भाजितयोर्ययोर्यः शेषस्तयोः स्यादपवर्त्तनं सः । तेनापवर्त्तेन विभाजितौ यौ तौ भाज्यहारौ दृढसंज्ञितौ स्तः । मिथोभजेत्तौ दृढभाज्यहारौ यावद्विभाज्ये भवतीह रूपम् । फलान्यधोऽधस्तदधोनिवेश्यः क्षेपस्तथान्ते खमुपान्तिमेन । स्वो-